# सुन्दरकाण्ड एकोनविंशः सर्गः (१९) - ॥ सीता वर्णनम् ॥

तस्मिन्नेव ततः काले राजपुत्री त्वनिन्दिता ।
रूप यौवन सम्पन्नं भूषणोत्तम भूषितम् ॥ १ ॥

ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् ।
प्रावेपत वरारोहा प्रवाते कदली यथा ॥ २ ॥

आच्छाद्योदर मूरुभ्यां बाहुभ्यां च पयोधरौ ।
उपविष्टा विशालाक्षी रुदन्ती वरवर्णिनी ॥ ३ ॥

दशग्रीवस्तु वैदेहीं रक्षितां राक्षसी गणैः ।
ददर्श सीतां दुःखार्तां नावं सन्ना मिवार्णवे ॥ ४ ॥

असंवृताया मासीनां धरण्यां संशित व्रताम् ।
छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ॥ ५ ॥

मल मण्डन चित्राङ्गीं मण्डनार्हा ममण्डिताम् ।
मृणाली पङ्क दिग्धेव विभाति न विभाति च ॥ ६ ॥

समीपं राज सिंहस्य रामस्य विदितात्मनः ।
सङ्कल्प हय सम्युक्तैर् यान्तीमिव मनोरथैः ॥ ७ ॥

शुष्यन्तीं रुदती मेकां ध्यान शोक परायणाम् ।
दुःखस्यान्त मपश्यन्तीं रामां राम मनुव्रताम् ॥ ८ ॥

वेष्टमानां तथाऽऽविष्टां पन्नगेन्द्र वधूमिव ।
धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ॥ ९ ॥

वृत्त शील कुले जाता माचारवति धार्मिके ।
पुनः संस्कार मापन्नां जातामिव च दुष्कुले ॥ १० ॥

अभूतेनाप वादेन कीर्तिं निपतितामिव ।
अम्नायाना मयोगेन विद्यां प्रशिथिलामिव ॥ ११ ॥

सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् ।
पूजा मिव परिक्षीणा माशां प्रतिहतामिव ॥ १२ ॥

आयतीमिव विध्वस्ता माज्ञां प्रतिहतामिव ।
दीप्तामिव दिशं काले पूजा मपहृतामिव ॥ १३ ॥

पद्मिनीमिव विध्वस्तां हतशूरां चमूमिव ।
प्रभामिव तमोध्वस्ता मुपक्षीणा मिवापगाम् ॥ १४ ॥

वेदीमिव परामृष्टां शान्ता मग्नि शिखामिव ।
पौर्णमासी मिव निशां राहुग्रस्तेन्दु मण्डलाम् ॥ १५ ॥

उत्कृष्ट पर्ण कमलां वित्रासित विहङ्गमाम् ।
हस्ति हस्त परामृष्टा माकुलां पद्मिनी मिव ॥ १६ ॥

पति शोकातुरां शुष्कां नदीं विस्राविताामिव ।
परया मृजया हीनां कृष्णपक्ष निशामिव ॥ १७ ॥

सुकुमारीं सुजाताङ्गीं रत्नगर्भ गृहोचिताम् ।
तप्यमाना मिवोष्णेन मृणाली मचिरोद् धृताम् ॥ १८ ॥

गृहीता मालितां स्तम्भे यूथपेन विनाकृताम् ।
निःश्वसन्तीं सुदुःखार्तां गजराज वधूमिव ॥ १९ ॥

एकया दीर्घया वेण्या शोभमाना मयत्नतः ।
नीलया नीरदापाये वनराज्या महीमिव ॥ २० ॥

उपवासेन शोकेन ध्यानेन च भयेन च ।
परिक्षीणां कृशां दीना मल्पाहारां तपोधनाम् ॥ २१ ॥

आयाचमानां दुःखार्तां प्राञ्जलिं देवतामिव ।
भावेन रघुमुख्यस्य दशग्रीव पराभवम् ॥ २२ ॥

समीक्षमाणां रुदती मनिन्दितां
सुपक्ष्म ताम्रायत शुक्ल लोचनाम् ।
अनुव्रतां राम मतीव मैथिलीं
प्रलोभयामास वधाय रावणः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥